# Shri Namamauktikamala

# શ્રીનામમૌક્તિકમાલા

## Document Information

Text title : Shri Namamauktikamala 03 01

File name : nAmamauktikamAlA.itx

Category : vishhnu

Location : doc_vishhnu

Proofread by : Rajesh Thyagarajan

Description/comments : From stotrArNavaH 03-01

Latest update : August 14, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 14, 2021

*sanskritdocuments.org*

# શ્રીનામમૌક્તિકમાલા

યત્પદામ્ભોરુહધ્યાનવિધ્વસ્તાશેષકલ્મષઃ ।
વસ્તુતાગુપયાતોઽહં યામુનેયં નમામિ તમ્ ॥ ૧॥

શ્રીનામમૌક્તિકૈર્માલા યામુનાર્યેણ નિર્મિતા ।
ઋષિસૂક્તિ (શુક્તિ) સમુદ્ભૂતૈર્નિર્દોષૈઃ શ્રુતિસાગરે ॥ ૨॥

આરાધનાય હરયે જગદાનન્દદાયિને ।
શ્રીનાથનાયકપતિ (મણિઃ) નારાયણગુણાન્વિતા ॥ ૩॥

સર્વકલ્યાણજનની જગન્મઙ્ગલવૈભવા ।
મનીષિભિર્મહાભાગૈર્વૈષ્ણવૈર્ધ્રિયતામિયમ્ ॥ ૪॥

શ્રીમન્નારાયણાદ્રીશ શ્રીમન્નઞ્જનશૈલપ ।
શ્રીમદ્વૃષભશૈલેન્દ્ર શ્રીમત્સિંહનગાધિપ ॥ ૫॥

શ્રીશેષગોત્રાભરણ શ્રીનિવાસેતિ કીર્તયે ।
અચ્યુતાનન્દ ગોવિન્દ મુકુન્દ ગરુડધ્વજ ॥ ૬॥

જગદાનન્દજનક જગજ્જન્માદિકારણ ।
નારાયણ જગન્નાથ શરણાગતવત્સલ ॥ ૭॥

સત્યસઙ્કલ્પ સર્વજ્ઞ સત્યકામ સનાતન ।
નિસ્સમાભ્યધિક સ્વસ્થ સ્વે મહિમ્નિ પ્રતિષ્ઠિત ॥ ૮॥

ત્રિવિક્રમ ત્રિલોકેશ શઙ્ખચક્રગદાધર ।
રમાનાથ રસાનાથ નીલાનાથ નિરઞ્જન ॥ ૯॥

નિત્ય નિર્દોષ નિસ્સીમમહાવિભવ શાશ્વત ।
ત્રિગુણાતીત ષાડ્ગુણ્યપરિપૂર્ણ પરાત્પર ॥ ૧૦॥

પુરુષોત્તમ રમાનાથ પુણ્યશ્રવણકીર્તન ।
નિર્વિકાર નિરાતઙ્ક નિત્યાનન્દ નિરામય ॥ ૧૧॥

યઝેશ યજ્ઞપુરુષ પુણ્ડરીકાક્ષ માધવ ।
વાસુદેવ વિભો વિષ્વક્સેન વૈકુણ્ઠ વામન ॥ ૧૨॥

નીલવર્ણાર્ણવશય શ્રીવલ્લભ જગત્પતે ।
ત્રય્યન્તગીતાસઙ્ખ્યેયસન્મઙ્ગલગુણાકર ॥ ૧૩॥

રમારમણ રાજીવદલચારુવિલોચન ।
નિત્યયૌવનસૌન્દર્યશીલ દિવ્યગુણાર્ણવ ॥ ૧૪॥

વેદવેદ્ય વિશાલાક્ષ વિશ્વમ્ભર ધરાપતે ।
દાશાર્હ દેવદેવેશ દામોદર દયાનિધે ॥ ૧૫॥

ધરણીધારકાધારનિલયાધોક્ષજાવ્યય ।
યોગિધ્યેય જગદ્વન્દ્ય જગત્સ્વામિન્ જનાર્દન ॥ ૧૬॥

નારસિંહ હયગ્રીવ હરે પ્રહ્લાદવત્સલ ।
લોકાધાર પરાધાર આત્માધાર ધરાધર ॥ ૧૭॥

રથાઙ્ગપાણે સર્વેશ સર્વલોકસમાશ્રય ।
ભૂતભવ્યભવન્નાથ વેઙ્કટાચલનાયક ॥ ૧૮॥

કૃષ્ણ વિષ્ણો વિશાલાક્ષ વૈજયન્તીવિરાજિત ।
ક્ષીરાર્ણવશયાનન્ત શરણ્યાશ્રિતવત્સલ ॥ ૧૯॥

સર્વાત્મન્ સર્વલોકેશ સર્વ સર્વાત્મનાયક ।
કરુણાકર કાલજ્ઞ સર્વલોકનિયામક ॥ ૨૦॥

મુઞ્જીકેશ હૃષીકેશ કેશિમર્દન કેશવ ।
નરકાન્તક કાકુત્સ્થ કાલાત્મન્ કાલપાચક ॥ ૨૧॥

કરીન્દ્રવરદાનન્દ શ્રીધર શ્રીનિકેતન ।
નિરવદ્ય પરબ્રહ્મન્ સર્વલોકપદાશ્રય ॥ ૨૨॥

નાથસેવ્યપદામ્ભોજ વકુલાભરણાશ્રય ।
રામારામાભિરામાઙ્ગ રામકૃષ્ણેતિ કીર્તયે ॥ ૨૩॥

શ્રીમદ્વેઙ્કટનાથમાદિપુરુષં પૂર્ણં પરં શાશ્વતં
    શ્રીનાથં શરણાગતાર્તિહરણં નારાયણં સંશ્રયે ।
કૃષ્ણં વિષ્ણુમનન્તમચ્યુતમજં ગોવિન્દમિન્દીવર-
    શ્યામં નન્દકશઙ્ખચક્રરુચિરં ધ્યાયન્ ભજે કીર્તયે ॥ ૨૪॥

યેનૈતત્પઠ્યતે નાનામ્નાષ્ટાવિંશોત્તરં શતમ્ ।
અનિષ્ટપક્ષક્ષપણમિષ્ટાવાપ્તિરવાપ્યતે ॥ ૨૫॥

ઇતિ શ્રીનામમૌક્તિકમાલા સમ્પૂર્ણા ।

Proofread by Rajesh Thyagarajan

*Shri Namamauktikamala*

pdf was typeset on August 14, 2021

Please send corrections to *sanskrit@cheerful.com*